**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN(o): 2581-6241
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 7.384
Volume - 8, Issue - 8, August - 2025

DOIs:10.2018/SS/202508003 --:-- Research Paper / Article / Review

# चिन्तामणिविजयचम्पूकाव्ये गुणतत्वविवेचनम्

[1] **Dr. Gyanadipti Bala,** [2] **Dr. Sala Besra**
[1] Faculty of Arts, PG. department of Sanskrit, Sriram Chandra Bhanj Deo University, Baripada
[2] Assistant Professor of Sanskrit, Gangadhar Meher University, Sambalpur
Email - [1]lipubala1@gmail.com , [2]salabesra@gmail.com

**शोध सारांश:** चिन्तामणिविजयचम्पूकाव्यस्य विषयवस्तुदृष्ट्या अत्र ओजस्तथा माधुर्यगुणद्वयं परिलक्षते । काव्यमुत्तमं भवेदेतर्थम् आवश्यकं यत् तत्र गुणानां समुचित: प्रयोग: स्यात् । केचनगुणाः रीतौ आश्रिता: इति स्वीकुर्वन्ति, केचन रीति: गुणाश्रिता इति । गुणः शब्दार्थयोः धर्म:, रसस्य धर्मः वा । भरतादारभ्य पण्डितराजजगन्नाथपर्यन्तं सर्वे काव्यशास्त्रीयाचार्याः स्व स्व साहित्यशास्त्रीयग्रन्थेषु गुणतत्वस्य विस्तरेण विवेचनं कृतवन्तः ।

**कूटशब्दा**:- चिन्तामणिविजयचम्पू:, रस:, रीति:, गुण:, अलंकर:, माधुर्यगुण:, ओजगुणः

## 1. प्रस्तावना-

काव्यशास्त्रीयदृष्ट्या काव्यगुणानां विवेचनं प्रथमतः भरतमुनिकृतनाट्यशास्त्रे उपलब्धम्, तत्र दशकाव्य गुणा उल्लिखिताः। दशकाव्यदोषाणां वर्णनानन्तरं तेषां विपर्ययो काव्यगुण इत्युच्यते। अत्र 'विपर्यय:' शब्दस्य कृते मतभेदाः दृश्यन्ते। यथा-अभाव:, अन्यथाभाव:, वैपरीत्यञ्च । भरतानुसारं दोषाणामभावः गुण इति । स दशगुणान् स्वीकृतवान् तद्यथा-श्लेषः, प्रसादः, समता, समाधिः, माधुर्यम्, ओजः,पदसौकुमार्यम्, अर्थव्यक्तिः, उदारता, कान्तिश्च । उत्तरवर्ती आचार्यः वामनस्तस्य दशगुणान् स्वीकृत्य शब्दगत- अर्थगतभेदेन विंशतिरिति प्रोक्तवान्। भरतोपरान्तं भामहेन काव्यालंकारे गुणस्वरूपमुपपादितम्। तस्य काव्यालंकारे गुणत्रिविधमुल्लिखितम्। माधुर्य-ओज-प्रसादश्च । एतेषु भरतस्य दशगुणानामन्तर्भावो जायते। भामहस्य परवर्तिनः आचार्याः त्रिविधगुणं स्वीकृत्य रसाश्रित इति उक्तवन्तः ।

दण्डिना भरतमुनेः दशविधगुणान् तेषां नामानि स्वीकारमकरोत् । परन्तु स्थाने स्थाने यत्र भरतेन शब्दप्राधानमुट्टङ्कितं तत्र दण्डिना अर्थप्राधान्यमङ्गीकृतम्। सरस्वतीकण्ठाभरणे भोजः दशगुणान् वर्णयामास । परन्तु शृङ्गारप्रकाशे गुणतत्त्वस्य विकाशो जायते। स्वाभिमतमिति भोजेन गुणस्य त्रैविध्यं परिकीर्त्तितम् यथा-बाह्याभ्यन्तरवैशेषिकाश्च। शब्दगतगुणाः बाह्यगुणा:, अर्थगतगुणाः आभ्यन्तरा:, दोषगुणा: वैशेषिकाः इत्युच्यन्ते।

आनन्दवर्धनानुसारं गुणाऽङ्गीरसस्य धर्मः । मम्मटोऽपि अस्य समर्थकः यथा शौर्यादय आत्मनः धर्माः तथा गुणा: रसानां धर्माः ।

विश्वनाथोऽपि आनन्दवर्धनमम्मटो वत् गुणाः काव्यस्य अङ्गिनः रसस्य धर्मा इति स्वीकुर्वन्ति ।अलंकारप्रस्थाने काव्यसौन्दर्यमलंकार इत्युच्यते। रीतिप्रस्थानराचार्याः काव्यशैल्या सौन्दर्यमधिकमहत्त्वं प्रदाय

पदसंघटनारीतिं काव्यस्यात्मा इति स्वीकुर्वन्ति। आनन्दवर्धनेन सर्वतत्त्वानां महत्त्वं स्वीकृत्य प्रसङ्गानुरूप तेषां स्थानं ध्वन्यालोके निरूपितम्। शब्दार्थौ काव्यस्य शरीरं रसादिध्वनिः तस्य आत्मा भवति।

काव्यशास्त्रे गुणालंकाराणां सम्बन्धः परस्परं परिपूरकः। आनन्दवर्धनात् प्राक् गुणालंकाराणां आश्रयस्य भिन्नता स्पष्टतया न निरुपिता आसीत्। भरतमुनिमते गुणालंकाराः वाचिकाभिनयं वर्धापयन्ति। शब्दार्थयोः वैभवबृद्धिश्च एषां धर्मः। काव्यशास्त्रे भामहेन माधुर्योजप्रसादगुणानामुल्लेखः कृतः परन्तु कुत्रापि गुणसज्ञा न प्रदत्ता।तस्य गुणशब्दस्याशयः अलंकार इति। काव्यानि गुणैः अलंकृतानि भवन्ति। अतः गुणा अपि अलंकारा इति भामहस्य मतम्। सर्वादौ गुणालंकारयोः भेद: दण्डिना काव्यादर्शे प्रदर्शितः। दण्डीमते काव्यशोभावर्द्धने सहायकतत्त्वानि अलंकार इत्युच्यन्ते। अनेन प्रकारेण गुणालंकारवृत्त्यादयः सर्वे अलंकारस्वरूपा: ।

वामनात् प्राक् विद्वद्भिः गुणालंकारयोः भेदनिरूपणं प्रयासयुक्तमासीत्। परन्तु एतादृशो विचारः शृङ्खलितितया वामनेन काव्यालंकारसूत्रे उपस्थापितः। परन्तु वामनस्य प्रयासः सार्थकोऽभूत्। अलंकारशब्दस्य प्रयोगों वामनेन अर्थद्वयमाश्रित्य विहितः कृतः- सामान्यार्थे काव्यस्य सौन्दर्यमलंकारः[1] अस्य आशयः काव्यसौन्दर्यस्य सर्वोपादानानि अलंकाराणि भवन्ति। अनया दृष्ट्या गुणोऽपि अलंकारो भविष्यति। अलंकारस्य हेतोः काव्यं ग्राह्यं भवति।[2] अतोऽलंकारः सौन्दर्यस्य पर्यायः। विषे।र्थे उपमारूपकादयः काव्यस्यालंकाराः एतस्य शोभां प्रतनुते। विशेषार्थे प्रयोगत्त्वात् अलंकारगुणयोर्मध्ये भेदो दृश्यते। काव्यशोभायाः हेतुभूतधार्मो गुणः।

'काव्यशोभायाः कर्त्तारो धर्मा गुणाः।[3]
'काव्यशोभावर्धनमलंकारस्य धर्मः।।[4]

तददतिशयहेतवस्त्वलंकाराः, गुणाभावे काव्यसौन्दर्यस्याभाव:। अतोऽलंकारः काव्यसौन्दर्यं स्रष्टुं न शक्नोति। अलंकार: केवलं सौन्दर्यवृद्धौ सायकः। काव्यस्य सौन्दर्यभावे अलंकार: व्यर्थः। गुण: काव्यसौन्दर्यस्य कारणं भवति, अलंकार: अभिवृद्धेः कारणम्। अतः गुणे स्थिते अलंकारस्य महत्त्वमनुभूतये, काव्यसौन्दर्यार्थं गुणस्य अनिर्वायता विद्यते। अतः गुणः काव्ये नित्यधर्मत्त्वेन विद्यते। अलंकाराभावे काव्ये सौन्दर्यं भवेत्। अतोऽलंकारः काव्यस्यानित्यधर्मः। अस्य विचारस्य पुष्टयिर्थमेका उपमा प्रदत्ता। यथा युवते: स्वभाविकसौन्दर्यमलंकाराभावेऽपि आह्लादयति, गुणयुक्तालंकारेणापि। अनेन प्रकारेण गुणयुक्तालंकारस्य भावे अभावेऽपि काव्यं मनोज्ञं भवति। परन्तु स्वभाविकलावण्य शून्ययुक्तेः सौन्दर्य सृष्टौ बृद्धौ वा अलंकार; असमर्थः। अतः काव्यशरीरे गुणयुक्तसौन्दर्याभावे उपमाद्यलंकारोऽपि असमर्थाः।[5]

आनन्दवर्धनेन अलंकारः कुण्डल्याद्याबूषणमित्या मन्यते। परन्तु सर्वान्नलंकारान् आभूषणवत् वहिरङ्गमिति न मन्यते। तस्य मतानुसारं यदि अलंकारो वाच्यः तदा काव्यशरीरेण सहित सम्बन्धितः। यत्र अलंकारो वाच्यो न भूत्वा ध्वन्यते तदा काव्यस्यात्मा भवति। आनन्दवर्धनमते ध्वनिः काव्यस्यात्मा आनन्दवर्धनानन्तरं मम्मटेन काव्यप्रकाशे गुणालंकारयोः भेदो निरूपितः। गुणस्य परिभाषा प्रसङ्गे तेन

---

[1] का. सू. पू.- १.१.२
[2] का. सू. पू.- १.१.१
[3] का. सू. पू.- ३.१.१
[4] का. सू. पू.- ३.३.२
[5] काव्यगुणों का शास्त्रीय विवेचनम्- प-.१

उक्तम्- आत्मनि अचलभावेन स्थित्वा तस्य उत्कर्षसाधकशौर्यादिवत् यो धर्मः काव्यस्याङ्गीरसे अविचलत्वेन स्थित्वा काव्यस्य उत्कर्षाधायको भवति स एव गुणः ।

उत्कर्षहतवस्ते स्युरचलस्थितयोः गुणाः ।।[6]

मम्मटानुसारं गुण: रसाश्रितः । रसहीनकाव्ये गुणस्यास्तित्वं न स्वीकरोति। विश्वनाथकविराजः गुणालंकाररीतीन् काव्यस्योत्कर्षहतवः इति प्रोक्तवान् ।[7] तस्य मते गुणः काव्यस्यआत्मस्वरूपरसस्य धर्मः । रसस्य धर्म: पुनः तं प्रति गौणत्वात् गुण इत्युच्यते। शब्दार्थगतगुणः काव्यस्य स्वतन्त्रधर्मः, शब्दार्थशोभाया: हेतुश्च । अतः रसोत्कर्षे सहायकत्वात् गुणः काव्यस्य उत्कर्षसाधने हेतुरिति दृढतया समर्थ्यते ।

चिन्तामणिविजयचम्पूकाव्यस्य विषयवस्तुदृष्ट्या अत्र ओजस्तथा माधुर्यगुणद्वयं परिलक्ष्यते।

**2. माधुर्यगुण: -**

विश्वनाथमतानुसारेण माधुर्यगुणस्य लक्षणम्-"चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते" अर्थात् मनसः आर्द्रतारूप: सुखविशेष: माधुर्यमुच्यते । मधुरस्य (रसस्य) भावो माधुर्यमिति।संम्भोगे करूणे विप्रलम्भे शान्तेऽधिकं भवतीति माधुर्यगुणः। सहृदयमनांसि तत्र सर्वाधिकं रञ्जयन्ति । मम्मटमतेऽपि चित्तद्रवीभावस्य कारणं, श्रृङ्गारे स्थीयमानं यदाह्लादस्वरुपं स माधुर्यगुण इत्युच्यते न केवलं माधुर्यगुणः संम्भोगश्रृङ्गारे तिष्ठति अपितु करूणविप्रलम्भशान्तरसेष्वपि उत्तरोत्तराधिक्येन विलसति ।माधुर्यगुणस्य व्यञ्जकवर्णाः-

मूर्ध्नि वर्गान्त्यवर्णेन युक्ताष्टठडढान् विना ।
रणौ लघु चद्वयक्तौ वर्णाः कातेरता तथा ।
अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा।।।[8]

चिन्तामणिविजयचम्पूकाव्यान्तर्गतमाधुर्यगुणस्य उदाहरणम् -

१.अगोचरं वाचां सम्पदं सुरसुन्दरीणां सुखप्रदन्नेत्राणां अलभ्यं नृपशूनां सुलभं पुप्यशीलानां तादृशमद्राक्षीदारामम्।[9]
२.विद्युल्लता सादृश लावण्यां कनकचम्पकमालमिव स्तिथां कामपि कन्यां लोचनाभ्यां परिरभ्यापरिमितमदनशरनियन्त्रितः मुहुर्मुमोह ।[10]
३.सर्वावयवा जानकीव रामारामाराधिता मलयाचलस्थलीव सपटीरसौरभ्या शकुन्तलेव परिचित भरता द्रौपदीव पञ्चमरागिणी गङ्गातरङ्गिणीव सन्नितराजहंसा भागवतगाथेव विलास ।[11]

" इत्थं विलप्य बहुधा कुपितं कुबेरं
सा गद्गदाश्रुकलुषं निजगादवाचम् ।

[6] का. प्र. – ८.६.६
[7] सा. द. प्रथमपरिच्छेदः - ३
[8] सा. द. ८/३४
[9] चि.वि.च- १/ पृ. ९
[10] चि.वि.च- १/ पृ. ९
[11] चि.वि.च- १/ पृ. १३

नोल्लङ्घिता खलुमया सरणिश्र्च किन्तु
दैवव्यतिक्रममिदं किमकाण्डएव ।।[12]
' इत्येवमश्रुजलजालनिषिक्तवस्त्रा
वामेकरे मुखसरोजमपास्तधैर्यम्
विन्दस्य चित्तजमहाज्वरतापिताङ्गी
पचुक्तोश सा प्रियमनोरथ हे सखेति ।।[13]

**3. ओजगुण: -**

ओजगुणः दीप्तिं परमामुज्ज्वलता समुद्रावयति । अस्य स्वरूप विद्यते चित्तस्याऽतिविस्मृतिः ।वीरवीभत्सरौद्ररसेषु गुणोऽयमवतिष्ठते । क्रमशश्चोतरोत्तर-मस्याऽतिशयो भवति ।

ध्वन्यालोककारेण उक्तम् -
"रौद्रादयो रसाः दीप्त्या लक्षन्ते काव्यवर्तिनः ।
तद्वव्यक्तिहेतु शब्दार्थावाश्रित्यौजो व्यवस्थितम् ।[14]

ओजगुणस्वरूपसन्दर्भे मम्मटाचार्येणोक्तम्-

"दीप्त्यात्मविस्मृतेर्हेतुरोजो वीररसस्थितिः ।
वीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण च ।।[15]

साहित्यदर्पणकारेणापि उक्तम्-
"ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते ।
वीरबीभत्सरौद्रेषु क्रमेणाधिक्यमस्य तु ।।[16]

चित्तस्य विस्ताररूपदीप्तत्वजनकौज गुणो वर्तते । दीप्तिरेका विशिष्टा वृत्तिः ।यया मनः प्रज्वलितमिव जायते । एतदेव चित्तस्य विस्तार इत्युच्यते ।

**4. ओजगुणस्य व्यञ्जकवर्णा :-**

ओजगुणस्याभिव्यञ्जकवर्णानां प्रसङ्गे साहित्यदर्पणकारेणापि साहित्यदर्पणस्याष्टमे परिच्छेदे मम्मटानुसारमेव
ओजगुणस्याभिव्यञ्जकवर्णा: प्रतिपादिता:-

"वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ।
उपर्यधो द्वयोर्वा सरेफष्टठडढैः सह ।।
शकारश्च षकारश्च तस्य व्यञ्जकता गता:
तथा समासो बहुलो घटनौद्धत्यशालिनी ।।[17]

---

12 चि.वि.च- १/ पृ. ३८
13 चि.वि.च- २/४४
14 ध्व. लो. २/३८
15 का..प्र.- ८/६६-७०
16 सा.द.-७/४
17 सा.द.- ७/५-६

चिन्तामणिविजयचम्पूकाव्ये ओजगुणस्य उदाहरणम् यथा -

उदण्डमत्तगजगण्डगलन्मदाम्बु-
सिन्धुत्पतज्जलकणैर्नन-स्सुराणाम्।
उदामयोघकारघट्टितलोहयन्त्र
सञ्जात वह्निशकलाः पृतनामुखेषु ।।[18]

**5. उपसंहार :**

काव्यस्याङ्गे रस-गुण-रीत्यलंकाराणां परिगणनमनिवीर्यत्वात् मया शोधनिबन्धेऽस्मिन् तेषां विवेचनं व्यधायि । तत्रादौ गुणस्य प्रतिपादनं यथायथं विहितम् । यतः गुणादृते काव्यं अधमत्वेन दोषन्वितं मन्यते। तस्मात् दोषाभावत्वं रसाश्रितत्वं काव्यस्य स्थायी धर्मः भवति । अतः एतादृशस्थायीधर्म-रसोत्कर्ष एव काव्यस्य गुणं गण्यते । तत्र आचार्यभरतमुनि-वामन-दण्डी-भामह-आनन्दवर्धन-मम्मट-कुन्तक- विश्वनाथप्रभृतयः काव्यगतगुणविचारे दत्तावधान: सन्ति ।

**संन्दर्भग्रन्थसूची :**

१. मिश्र, डॉ. शोभाकान्त, काव्यगुणो का शास्त्रीय विवेचन, बिहारहिन्दीग्रन्थअकादमी, पटना, १९७२ ।
२. शर्मा,केदारनाथः, काव्यालंकारसूत्रवृत्तिः, चैखम्बाकृष्णदासअकादमी, वाराणासी।
३. उपाध्याय, आचार्यः श्रीशिवजीः, काव्यप्रकाशः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वारणासी
४. मुसलगांवकरः, डॉ.गजाननशास्त्री, काव्यप्रकाशः, चैखम्बाकृष्णदासअकादमी, वाराणसी, २०१६।
५. शिवानन्दयतिः, चिन्तामणिविजयचम्पूः, प्रतिलिकर: पी. एन. राघवाचार्यन्, १९३९-४० ॥
८. जगन्नाथपाठक आचार्यः, ध्वन्यालोकः, चैखम्बाविद्याभवन, वाराणसी, पञ्चमसंस्करण १९९२ ।
९. द्विवेदी, डॉ. शिवप्रसाद, ध्वन्यालोकः, चैखम्बासुरभारतीप्रकाशन, वाराणसी, २०१३।
१०. झा, सुभद्रा, भारतीय साहित्य का इतिहास ,मोतीलालबनारसीदास, प्रथमसंस्करण, १९७८
११. सहाय, डॉ. राजवंश ,भारतीय साहित्यशास्त्र कोश 'हीरा' बिहारहिन्दीग्रन्थअकादमी, पाटना।
१२ . शास्त्री, आचार्यः कृष्णमहोन, साहित्यदर्पणः, चौखम्बासंस्कृतसंस्थान, वारणासी, २०११।
१३. शमरिग्मी, आचार्य: शेषराज, साहित्यदर्पणः, चैखम्बाकृष्णदासअकादमी, वाराणसी।
१४.: सिंहः, डॉ. सत्यव्रत, साहित्यदर्पण, चैखम्बाविद्याभवन, वाराणसी, तुर्थसंस्करणम्, १९७६।

[18] चि.वि. च – ४/११४